# सप्तभगिन्यः

**प्रश्नः 1. उच्चारणं कुरुत**–(उच्चारण कीजिए–)

| | | |
|---|---|---|
| सुप्रभातम् | महत्त्वाधायिनी | पर्वपरम्पराभिः |
| चतुर्विंशतिः | द्विसप्ततितमे | वंशवृक्षनिर्मितानाम् |
| सप्तभगिन्यः | प्राकृतिकसम्पद्भिः | वंशोद्योगोऽयम् |
| गुणगौरवदृष्ट्या | पुष्पस्तबकसदृशानि | अन्ताराष्ट्रियख्यातिम् |

**उत्तरम्**– विद्यार्थी स्वयं करें।

**प्रश्नः 2. प्रश्नानाम् उत्तराणि एकपदेन लिखत**–(प्रश्नों के उत्तर एक पद में लिखिए–)

(क) अस्माकं देशे कति राज्यानि सन्ति?

(ख) प्राचीनेतिहासे काः स्वाधीनाः आसन्?

(ग) केषां समवायः 'सप्तभगिन्यः' इति कथ्यते?

(घ) अस्माकं देशे कति केन्द्रशासितप्रदेशाः सन्ति?

(ङ) सप्तभगिनी-प्रदेशे कः उद्योगः सर्वप्रमुखः?

**उत्तरम्**– (क) अष्टाविंशतिः, (ख) सप्तभगिन्यः, (ग) सप्तराज्यानाम्, (घ) सप्त, (ङ) वंशोद्योगः/वंश-उद्योगः।

**प्रश्नः 3. अधोलिखितपदेषु प्रकृति-प्रत्ययविभागं कुरुत**–(निम्नलिखित पदों के प्रकृति-प्रत्ययों का विभाग कीजिए–)

| | पदानि | प्रकृतिः | | प्रत्ययः |
|---|---|---|---|---|
| यथा- | गन्तुम् | गम् | + | तुमुन् |
| | ज्ञातुम् | ............ | + | ............ |
| | ग्रहीतुम् | ............ | + | ............ |
| | पातुम् | ............ | + | ............ |
| | श्रोतुम् | ............ | + | ............ |
| | भ्रमितुम् | ............ | + | ............ |

**उत्तरम्**– ज्ञा + तुमुन्, ग्रह् + तुमुन्, पा + तुमुन्, श्रु + तुमुन्, भ्रम् + तुमुन्।

**प्रश्नः 4. पाठात् चित्वा तद्भवपदानां कृते संस्कृतपदानि लिखत**–(तद्भव पदों के लिए पाठ से चुनकर संस्कृत पद लिखिए–)

| | तद्भव-पदानि | संस्कृत-पदानि |
|---|---|---|
| यथा- | सात | सप्त |
| | बहिन | ................. |
| | संगठन | ................. |
| | बाँस | ................. |
| | आज | ................. |
| | खेत | ................. |

**उत्तरम्**–

| तद्भव-पदानि | संस्कृत-पदानि |
|---|---|
| बहिन | भगिनी |
| संगठन | सङ्घटनम् |
| बाँस | वंशम् |
| आज | अद्य |
| खेत | क्षेत्रम् |

**प्रश्नः 5. भिन्नप्रकृतिकं पदं चिनुत**–(भिन्न प्रकृति वाले पद चुनिए–)

(क) गच्छति, पठति, धावति, अहसत्, क्रीडति।

(ख) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः।

(ग) पत्रम्, मित्रम्, पुष्पम्, आम्रः, नक्षत्रम्।

(घ) व्याघ्रः, भल्लूकः, गजः, कपोतः, वृषभः, सिंहः।

(ङ) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा।

**उत्तरम्**– (क) अहसत् , (ख) लेखिका , (ग) आम्रः , (घ) कपोतः , (ङ) यानम् ।

**प्रश्नः 6. मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत**–(मञ्जूषा से क्रिया-पद चुनकर रिक्त स्थानों की पूर्ति कीजिए–)

| सन्ति | अस्ति | प्रतीयन्ते | वर्तते | इच्छामि | निवसन्ति | वर्तन्ते |
|---|---|---|---|---|---|---|

(क) अयं प्रयोगः प्रतीकात्मकः ......................।

(ख) सप्त केन्द्रशासितप्रदेशाः ......................।

(ग) अत्र बहवः जनजातीयाः ......................।

(घ) अहं किमपि श्रोतुम् ......................।

(ङ) तत्र हस्तशिल्पिनां बाहुल्यं ......................।

(च) सप्तभगिनीप्रदेशाः रम्याः हृद्याः च ......................।

(छ) गुणगौरवदृष्ट्या इमानि वृहत्तराणि ......................।

**उत्तरम्**– (क) अयं प्रयोगः प्रतीकात्मकः **वर्तते**।

(ख) सप्त केन्द्रशासितप्रदेशाः **सन्ति**।

(ग) अत्र बहवः जनजातीयाः **निवसन्ति**।

(घ) अहं किमपि श्रोतुम् **इच्छामि**।

(ङ) तत्र हस्तशिल्पिनां बाहुल्यं **अस्ति**।

(च) सप्तभगिनीप्रदेशाः रम्याः हृद्याः च **वर्तन्ते**।

(छ) गुणगौरवदृष्ट्या इमानि वृहत्तराणि **प्रतीयन्ते**।

**प्रश्नः 7. विशेष्य-विशेषणानाम् उचितं मेलनम् कुरुत**–(विशेष्य और विशेषण का सही मिलान कीजिए–)

| **विशेष्य-पदानि** | **विशेषण-पदानि** |
|---|---|
| अयम् | संस्कृतिः |
| संस्कृतिविशिष्टायाम् | इतिहासे |
| महत्त्वाधायिनी | प्रदेशः |
| प्राचीने | समवायः |
| एकः | भारतभूमौ |

**उत्तरम्**–

| **विशेष्य-पदानि** | **विशेषण-पदानि** |
|---|---|
| अयम् | प्रदेशः |
| संस्कृतिविशिष्टायाम् | भारतभूमौ |
| महत्त्वाधायिनी | संस्कृतिः |
| प्राचीने | इतिहासे |
| एकः | समवायः |

## अतिरिक्त-अभ्यासः

**(1) मञ्जूषायाः सहायतया अधोदत्तं पाठांशम् पूरयत**–(मञ्जूषा की सहायता से निम्नलिखित पाठांश को पूरा कीजिए–)

मालती – महोदये! तत्र तु ________ अपि प्राप्यन्ते?

अध्यापिका – आम्। प्रदेशेऽस्मिन् ________ बाहुल्यं वर्तते। आ वस्त्राभूषणेभ्यः गृहनिर्माणपर्यन्तं प्रायः वंशवृक्षनिर्मितानां ________ उपयोगः क्रियते। यतो हि अत्र ________ प्राचुर्यं विद्यते। साम्प्रतं वंशोद्योगोऽयं ________ अवाप्तोऽस्ति।

| वंशवृक्षाणम्, वंशवृक्षाः अन्ताराष्ट्रियख्यातिम्, हस्तशिल्पानाम्, वस्तूनाम् |
|---|

**उत्तरम्**– वंशवृक्षाः, हस्तशिल्पानाम्, वस्तूनाम्, वंशवृक्षाणम्, अन्ताराष्ट्रियख्यातिम्

**(2) परस्परमेलनम् कुरुत**–(परस्पर मेल कीजिए–)

| **(क)** पर्यायपदानि | | **(ख)** विशेषणविशेष्यानि | |
|---|---|---|---|
| समवायः | बाहुल्यम् | इमानि | भगिनीनाम् |
| प्रथितः | निपुणाः | अस्मिन् | प्रयोगः |
| सार्धम् | भवतु | इमाः | राज्यानि |
| निष्णताः | समूहः | इयम् | काले |
| प्राचुर्यम् | विख्यातः/प्रसिद्धः | अयम् | सप्तभगिन्यः |
| अस्तु | सह | एतासाम् | भावना |

**उत्तरम्**–

| **(क)** | | **(ख)** | |
|---|---|---|---|
| समवायः | समूहः | इमानि | राज्यानि |
| प्रथितः | विख्यातः/प्रसिद्धः | अस्मिन् | काले |

| | | | |
|---|---|---|---|
| सार्धम् | सह | इमाः | सप्तभगिन्यः |
| निष्णाताः | निपुणाः | इयम् | भावना |
| प्राचुर्यम् | बाहुल्यम् | अयम् | प्रयोगः |
| अस्तु | भवतु | एतासां | भगिनीनाम् |

**(3) भिन्नप्रकृतिकं पदं चिनुत**–(भिन्न प्रकृति का पद चुनिए–)

1. अभवत्, कथयति, सन्ति, वर्तते, जानाति।
2. तत्र, अपि, तथा, कथम्, साम्प्रतम्, वयम्।
3. समीचीनः, रम्याः, लघूनि, प्रथितानि, वस्तूनि।
4. महोदया, भावना, भगिनी, प्रकृतिः, मनोरमा।

**उत्तरम्**– 1. अभवत् (शेष पद वर्तमानकालिक)
2. वयम् (शेष अव्ययपद)
3. वस्तूनि (शेष विशेषण पद)
4. मनोरमा (शेष संज्ञापद)

**(4) रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणम् कुरुत**–(रेखांकित पद के आधार पर प्रश्ननिर्माण कीजिए–)

1. अस्माकं देशे अष्टाविंशतिः राज्यानि सन्ति।
2. एतासां भगिनीनां संस्कृतिः महत्त्वाधायिनी।
3. एतेषाम् राज्यानां पुनः सङ्घटनम् विहितम्।
4. भगिनीप्रदेशोऽयं भ्रमणाय समीचीनः।
5. अस्मिन् प्रदेशे हस्तशिल्पानां बाहुल्यं वर्तते।

किमर्थम्, का, कति, केषाम्, किम्

**उत्तरम्**– 1. अस्माकं देशे कति राज्यानि?
2. एतासां भगिनीनां का महत्त्वाधायिनी?
3. एतेषां राज्यानां पुनः किं विहितम्?
4. भगिनीप्रदेशोऽयं किमर्थं समीचीनः?
5. अस्मिन् प्रदेशे केषां बाहुल्यं वर्तते?

## बहुविकल्पीयप्रश्नाः

**(1) प्रदत्तविकल्पेभ्यः उचितपदं चित्वा अधोदत्तानि वाक्यानि पूरयत**–(दिए गए विकल्पों में से उचित पद चुनकर निम्नलिखित वाक्यों को पूरा कीजिए–)

**(क)** 1. सप्तभागिनी-प्रदेशे जनाः ________ वदन्ति।
**(एकाम् भाषाम्, राष्ट्रियभाषाम्, विविधाः भाषाः)**

2. अत्र बहवः ________ निवसन्ति।
(प्रदेशाः, राज्यानि, जनजातीयाः)

3. भगिनीसप्तके राज्यानि क्षेत्र परिमाणैः ________ वर्तन्ते।
(लघूनि, बृहत्तराणि, समृद्धानि)

4. एतेषाम् राज्यानां पुनः ________ त्रिपुराराज्योद्घाटन-क्रमे अभवत्।
(शासनम्, सङ्घटनम्, वैशिष्ट्यम्)

5. अस्माकं देशे ________ राज्यानि सन्ति। (चतुर्विंशतिः, पञ्चविंशतिः, अष्टाविंशतिः)

**उत्तरम्**– 1. विविधाः भाषाः 2. जनजातीयाः 3. लघूनि 4. सङ्घटनम् 5. अष्टाविंशतिः

**(ख)** 1. अस्माकं देशे ________ केन्द्रप्रशासित-प्रदेशाः सन्ति। (सप्त, सप्ताः, सप्तम्)

2. भगिनीसप्तके प्रदेशे जनाः ________ ऊर्जस्विनः सन्ति।
(शरीरम्, शरीराणि, शरीरेण)

3. इमानि राज्यानि ________ इति कथ्यन्ते।
(सप्तभगिन्यः, सप्तभगिन्याः, सप्तभगिनी)

4. अत्र वंशवृक्ष-निर्मितानां वस्तूनाम् ________ क्रियते।
(उपयोगम्, उपयोगः, उपयोग)

5. ________! तत्र तु वंशवृक्षाः अपि प्राप्यन्ते।
(महोदया, महोदये, महोदयः)

**उत्तरम्**– 1. सप्त 2. शरीरेण 3. सप्तभगिन्यः 4. उपयोगः 5. महोदये

**(2) उचितं पदं चित्वा रिक्तस्थानपूर्तिं कुरुत–**(उचित पद चुनकर रिक्त स्थान पूर्ति कीजिए–)

1. छात्राः वदन्ति–भवती ________ सार्धं चलतु।

   (अस्माकम्, अस्माभिः, अस्मान्)

2. ________ प्रदेशे वंशवृक्षाणां प्राचुर्यं वर्तते।

   (अयम्, एते, अस्मिन्)

3. ________ विचारः मह्यम रोचते। (इदम्, इयम्, अयम्)

4. आगामिनी अवकाशे वयं तत्रैव ________ गमिष्यामः।

   (भ्रमयितुम्, भ्रमतुम्, भ्रमितुम्)

5. कङ्कणम् ________ सः हस्तं प्रसारयति।

   (गृहीतुम्, ग्रहितुम्, ग्रहीतुम्)

**उत्तरम्–** 1. अस्माभिः 2. अस्मिन् 3. अयम् 4. भ्रमितुम्

5. ग्रहीतुम्